तथाग्निहोमेन च यान्तु तृप्तिं
सदा पितृभ्यः प्रणतोऽस्मि तेभ्यः ॥
ये देवपूर्व्वाण्यभितृप्तिहेतो-
रश्नन्ति कव्यानि शुभाहृतानि ।
तृप्ताश्च ये भूतिसृजो भवन्ति
तृप्यन्तु तेऽस्मिन् प्रणतोऽस्मि तेभ्यः ॥
रक्षांसि भूतान्यसुरांस्तथोग्रान्
निर्णाशयन्तस्त्वशिवं प्रजानाम् ।
आद्याः सुराणाममरेशपूज्या-
स्तृप्यन्तु तेऽस्मिन् प्रणतोऽस्मि तेभ्यः ॥
अग्निष्वात्ता बर्हिषद आज्यपाः सोमपास्तथा ।
व्रजन्तु तृप्तिं श्राद्धेऽस्मिन् पितरस्तर्पिता मया ॥
अग्निष्वात्ताः पितृगणाः प्राचीं रक्षन्तु मे
दिशम् ।
तथा बर्हिषदः पान्तु याम्यां ये पितरःस्थिताः ॥
प्रतीचीमाज्यपास्तद्वदुदीचीमपि सोमपाः ।
ऊर्द्ध्वतस्त्वर्य्यमा रक्षेत् कव्यवालोऽनलोऽप्यधः ॥
रक्षोभूतपिशाचेभ्यस्तथैवासुरदोषतः ।
सर्व्वतश्चाधिपस्तेषां यमो रक्षां करोतु मे ॥
विश्वो विश्वभुगाराध्यो धन्यो धर्म्मः सनातनः ।
भूतिदो भूतिकृद्भूतिः पितॄणां ये गणा नव ॥
कल्याणः कल्यदः कर्त्ता कल्यः कल्यतराश्रयः ।
कल्यताहेतुरनघः षडित्येते गणाः स्मृताः ॥
वरो वरेण्यो वरदस्तुष्टिदः पुष्टिदस्तथा ।
विश्वपाता तथा धाता सप्त चैते गणाः स्मृताः ॥
महान्महात्मा महितो महिमावान्महाबलः ।
गणाः पञ्च तथैवैते पितॄणां पापनाशनाः ॥
सुखदो धनदश्चान्यो धर्म्मदोऽन्यो विभूतिदः ।
पितॄणां कथ्यते चैतत्तथा गणचतुष्टयम् ॥
एकत्रिंशत् पितृगणा यैर्व्याप्तमखिलं जगत् ।
ते मेऽत्र तृप्तास्तुष्यन्तु यच्छन्तु च समीहितम् ॥”
इति मार्कण्डेयपुराणे रौच्ये मन्वन्तरे पितृस्तवः ॥

मार्कण्डेय उवाच ।

“एवन्तु स्तुवतस्तस्य तेजसो राशिरुच्छ्रितः ।
प्रादुर्बभूव सहसा गगनव्याप्तिकारकः ॥
तद्दृष्ट्वा सुमहत्तेजः समाच्छाद्य स्थितं जगत् ।
जानुभ्यामवनिं गत्वा रुचिः स्तोत्रमिदं जगौ ॥
अमूर्त्तानाञ्च मूर्त्तानां पितॄणां दीप्ततेजसाम् ।
नमस्यामि सदा तेषां ध्यानिनां दिव्यचक्षुषाम् ॥
इन्द्रादीनाञ्च नेतारो दक्षमारीचयोस्तथा ।
सप्तर्षीणान्तथान्येषां तान् नमस्यामि काम-
दान् ॥
मन्वादीनाञ्च नेतारः सूर्य्याचन्द्रमसोस्तथा ।
तान्नमस्याम्यहं सर्व्वान् पितॄनप्स्वर्णवेषु च ॥
नक्षत्राणां ग्रहाणाञ्च वाय्वग्निनभसां तथा ।
द्यावापृथिव्योश्च तथा नमस्यामि कृताञ्जलिः ॥
प्रजापतेः कश्यपाय सोमाय वरुणाय च ।
योगेश्वरेभ्यश्च तथा नमस्यामि कृताञ्जलिः ॥
नमो गणेभ्यः सप्तभ्यस्तथा लोकेषु सप्तसु ।
स्वयम्भुवे नमस्यामि ब्रह्मणे योगचक्षुषे ॥
सोमाधाराः पितृगणा योगमूर्त्तिधरा हि ते ।
नमस्यामि ततः सोमं पितरं जगतामहम् ॥
अग्निरूपांस्तथैवान्यान्नमस्यामि पितॄनहम् ।
अग्नीषोममयं विश्वं यत एतदशेषतः ॥
ये तु तेजसि ये चैते सोमसूर्य्याग्निमूर्त्तयः ।
जगत्स्वरूपिणश्चैव तथा ब्रह्मस्वरूपिणः ॥
तेभ्योऽखिलेभ्यो योगिभ्यः पितृभ्यो यतमानसः ।
नमो नमो नमस्ते मे प्रसीदन्तु स्वधाभुजः ॥

श्रीमार्कण्डेय उवाच ।

एवं स्तुतास्ततस्तेन तेजसो मुनिसत्तमाः ।
निश्चक्रमुस्ते पितरो भासयन्तो दिशो दश ॥
निवेदितन्तु यत्तेन पुष्पगन्धानुलेपनम् ।
तद्भूषितानथ स तान् ददृशे पुरतः स्थितान् ॥
प्रणिपत्य रुचिर्भक्त्या पुनरेव कृताञ्जलिः ।
नमस्तुभ्यं नमस्तुभ्यमित्याह पृथगादृतः ॥
ततः प्रसन्नाः पितरस्तमूचुर्मुनिसत्तमम् ।
वरं वृणीष्वेति स तानुवाचानतकन्धरः ॥
साम्प्रतं सर्गकर्तृत्वमादिष्टं ब्रह्मणा मम ।
सोऽहं पत्नीमभीप्सामि धन्यां दिव्यां प्रजाव-
तीम् ॥

पितर ऊचुः ।

अद्यैव सद्यः पत्नी ते भविष्यति मनोरमा ।
तस्याञ्च पुत्त्रो भविता भवतो मुनिसत्तम ! ॥
मन्वन्तराधिपो धीमान् त्वन्नाम्नैवोपलक्षितः ।
रुचे रौच्य इति ख्यातिं प्रयास्यति जगत्त्रये ॥
तस्यापि बहवः पुत्त्रा महाबलपराक्रमाः ।
भविष्यन्ति महात्मानः पृथिवीपरिपालकाः ॥
त्वञ्च प्रजापतिर्भूत्वा प्रजाः सृष्ट्वा चतुर्विधाः ।
क्षीणाधिकारो धर्म्मज्ञस्ततः सिद्धिमवाप्स्यसि ॥
स्तोत्रेणानेन च नरो योऽस्मांस्तोष्यति भक्तितः ।
तस्य तुष्टा वयं भोगान् दास्यामो ज्ञानमुत्तमम् ॥
शरीरारोग्यमैश्वर्य्यं पुत्त्रपौत्त्रादिसन्ततिम् ।
प्रदास्यामो न सन्देहो यच्चान्यदभिवाञ्छितम् ॥
तस्मात् पुण्यफलं लोके वाञ्छद्भिः सततं नरैः ।
पितॄणाञ्चाक्षयां तृप्तिं स्तव्याः स्तोत्रेण मानवैः ॥
श्राद्धे च य इमं भक्त्या अस्मत्प्रीतिकरं स्तवम् ।
पठिष्यन्ति द्विजाग्र्याणां भुञ्जतां पुरतः स्थिताः ॥
स्तोत्रश्रवणसंप्रीत्या सन्निधाने परे कृते ।
अस्माभिरक्षयं श्राद्धं तद्भविष्यत्यसंशयम् ॥
यद्यप्यश्रोत्रियं श्राद्धं यद्यप्युपहतं भवेत् ।
अन्यायोपात्तवित्तेन यदि वा कृतमन्यथा ॥
अश्राद्धार्हैरुपहृतैरुपहारैस्तथा कृतम् ।
अकालेऽप्यथवा देशे विधिहीनमथापि वा ॥
अश्रद्धया वा पुरुषैर्दम्भमाश्रित्य वा कृतम् ।
अस्माकं प्रीतये श्राद्धं तथाप्येतदुदीरणात् ॥
यत्रैतत् पठ्यते श्राद्धे स्तोत्रमस्मत्सुखावहम् ।
अस्माकं जायते तृप्तिस्तत्र द्वादशवार्षिकी ॥
हेमन्ते द्वादशाब्दानि तृप्तिमेतत् प्रयच्छति ।
शिशिरे द्विगुणाब्दानि तृप्तिं स्तोत्रमिदं शुभम् ॥
वसन्ते षोड़शसमास्तृप्तये श्राद्धकर्म्मणि ।
ग्रीष्मे च षोड़शैवैतत् पठितं तृप्तिकारकम् ॥
विकले च कृते श्राद्धे स्तोत्रेणानेन साधिते ।
वर्षासु तृप्तिरस्माकमक्षया जायते रुचे ॥
शरत्कालेऽपि पठितं श्राद्धकाले प्रयच्छति ।
अस्माकमेतत् पुरुषैस्तृप्तिं पञ्चदशाब्दिकीम् ॥
यस्मिन् गृहेऽपि लिखितमेतत्तिष्ठति नित्यदा ।
सन्निधानं कृते श्राद्धे तत्रास्माकं भविष्यति ॥
तस्मादेतत्त्वया श्राद्धे विप्राणां भुञ्जतां पुरः ।
श्रावणीयं महाभाग अस्माकं तुष्टिकारकम् ॥”
इति मार्कण्डेयपुराणे रौच्ये मन्वन्तरे पितृस्तवे ॥ *

मार्कण्डेय उवाच ।

“ततस्तस्मान्नदीमध्यात् समुत्तस्थौ मनोरमा ।
प्रम्लोचा नाम तन्वङ्गी तत्समीपे वराप्सराः ॥
सा चोवाच महात्मानं रुचिं सुमधुराक्षरम् ।
प्रश्रयावनता सुभ्रूः प्रम्लोचा वै वराप्सराः ॥
अतीवरूपिणी कन्या मत्सुता तपतांवर ।
जाता वरुणपुत्त्रेण पुष्करेण महात्मना ॥
तां गृहाण मया दत्तां भार्य्यार्थे वरवर्णिनीम् ।
मनुर्म्महामतिस्तस्यां समुत्पत्स्यति ते सुतः ॥

मार्कण्डेय उवाच ।

तथेति तेन चाप्युक्ता तस्मात्तोयाद्वपुष्मतीम् ।
उज्जहार ततः कन्यां मालिनीं नाम नामतः ॥
नद्याञ्च पुलिने तस्मिन् स मुनिर्मुनिसत्तम ! ।
जग्राह पाणिं विधिवत् समानाय्य महामुनीन् ॥
तस्यां तस्य सुतो जज्ञे महावीर्य्यो महामतिः ।
रौच्योऽभवत् पितुर्नाम्ना ख्यातोऽत्र वसुधातले ॥
तस्य मन्वन्तरे देवास्तथा सप्तर्षयश्च ये ।
तनयाश्च नृपाश्चैव ते सम्यक् कथितास्तव ॥
धर्म्मवृद्धिस्तथारोग्यं धनधान्यसुतोद्भवः ।
नृणां भवत्यसन्दिग्धमस्मिन् मन्वन्तरे श्रुते ॥
पितृस्तवं तथा श्रुत्वा पितॄणाञ्च तथा गणान् ।
सर्व्वान् कामानवाप्नोति तत्प्रसादान्नरो मुने ॥”
इति मार्कण्डेयपुराणे रौच्यमन्वन्तरं समाप्तम् ॥
गारुड़े ८९ । ९० अध्यायेऽप्येतदस्ति ॥

रुचितं, त्रि, (रोचते इति । रुच् + “रुचिवचि-कुचिकुटिभ्यः कितच् ।” उणा० ४ । २८५ । इति कितच् ।) मिष्टवस्तु । इत्युणादिकोषः ॥ (रुच् + क्तः । अभिलषितः । यथा, महा-भारते । ५ । १०० । १६ ।

“मातले कच्चिदत्रापि रुचितस्ते वरो भवेत् ॥”

क्ली, रुच् + भावे क्तः । इच्छा । अभिलाषः । यथा, महाभारते । ३ । २६६ । ७८ ।

“वसावेह यथाकामं रुचितं यदि तेऽनघ ॥”)

रुचिफलं, क्ली, (रुचिजनकं फलम् ।) अम्लता-क्रम् । इति राजनिर्घण्टः ॥

रुचिरं, क्ली, (रोचते इति । रुच् + “इषिमदि-मुदीति ।” उणा० १ । ५२ । इति किरच् ।) मूलकम् । कुङ्कुमम् । लवङ्गम् । इति राज-निर्घण्टः ॥ (पुं, सेनजित्पुत्त्रः । यथा, हरि-वंशे । २० । २१ ।

“पुत्त्राः सेनजितश्चासंश्चत्वारो लोकसत्तमाः ।
रुचिरः श्वेतकेतुश्च महिम्नारस्तथैव च ॥”)

रुचिरं, त्रि, (रुच् + किरच् ।) सुन्दरम् । इत्य-मरः ॥ (यथा, आर्य्यासप्तशत्याम् । ११७ ।

“उल्लसितभ्रूधनुषा तव पृथुना लोचनेन रुचि-
राङ्गि ।